नेत्रदृष्टवस्तुन एव सत्यतासंवादितया तस्य सत्यत्वम् । "सत्यस्याक्षिभुवो यथा, इति श्रुतिः । [वृक्षे ।

**अक्षिभेषज** न० ६त० नेत्ररोगविशेषनिवारके पट्टिकालोध्र-

**अक्षिभ्रुव** न० भ्रुवौ च अक्षिणी च समा०द्व० । राजदन्तादि० अक्षिशब्दस्य बह्वच्कत्वेऽपि पूर्व्वनि० अच्समा० । भ्रूनेत्र-संघाते "सौमित्रिरक्षिभ्रुवसुब्जिहान" इति भट्टिः ।

**अक्षिव** पु० अक्षि वाति प्रीणाति अञ्जनेन वा-क । (सजना) शोभाञ्जनवृक्षे सामुद्रलवणे च ।

**अक्षिविकूणित** न० अक्ष्णः विकूणितं लज्जादिना सम्यक् प्रसाराभावात् सङ्कोचोय त्र । अपाङ्गदर्शने कटाक्षपाते

**अक्षीव** न० न क्षीवते माद्यति क्षीव-क, क्त वा न०त० । शोभाञ्जने (सजना) सामुद्रलवणे च । मत्तभिन्ने त्रि० । वान्तोयमित्यन्ये । [इति वेदः ।

**अक्षु** न० अक्ष-उ । शीघ्रे । "जूर्णौ मक्षुवाङ्क्षेयजला"

**अक्षुध्य** त्रि० अक्षुधे हितम् अक्षुध्+यत् । क्षुधाभावसाधने द्रव्ये । "अक्षुध्या अतृष्यास्त स्तहामासत्त्विभीतनेति"वेदः ।

**अक्षेत्र** न० अप्रशस्तं क्षेत्रं न०त० । शस्यानुत्पादके क्षेत्रे उपदेशानर्हे शिष्ये, अपात्रे च । "अक्षेत्रे वीजमुत्-सृष्टमन्तरैव बिनश्यतीति" पुरा० ।

**अक्षेत्रविद्** त्रि० क्षेत्रं देहतत्त्वं तत्त्वतो न जानाति विद्-क्विप् अस० स० । क्षेत्रतत्त्वानभिज्ञे आत्मत्वेन देहाभिमानिनि जीवे । "अक्षेत्रविद्ध क्षेत्रमिदं ह्यप्राट् प्रैति क्षेत्रविदा-नुशिष्ट" इति वेदः ।

**अक्षेत्रिन्** पु० क्षेत्रं शस्योत्पत्तिस्थानं कलत्रं वा मत्वर्थे इनि न०त० । क्षेत्रस्वामिभिन्ने । "येऽक्षेत्रिणो वीजवन्तः परक्षेत्रे प्रवापिन इति" स्मृतिः ।

**अक्षोट** पु० अक्ष-ओट, अक्षस्य विभीतकस्येव उटानि पर्णान्यस्य वा । पर्व्वतीयपीलुभेदे (आखरोट) स्वार्थे कन् तत्रैव ।

**अक्षोड** पु० अक्ष-ओड अक्षः विभीतक इव ओडति पत्रैः सं-हन्यते उड-अच् वा । पर्व्वतीयपीलुवृक्षे (आखरोट) स्वार्थे कन् तत्रैव ।

**अक्षोभ्य** त्रि० क्षोभ्यते विचाल्यते क्षुभ-णिच् कर्म्मणि यत् न० त० । भ्रमयितुमशक्ये "इक्ष्वाकुबलमक्षोभ्यमिति" पुरा० । तन्त्रोक्ते द्वितीयविद्यामन्त्रोपासके तद्देवतायाः शिरसि नागरूपेण स्थिते ऋषिभेदे पु० । "अक्षोभ्योऽस्याऋषिः प्रोक्त, इति तन्त्रम् ।

**अक्षोभ्यकवच** न० अक्षोभाय हितमक्षोभ्यं कर्म्म० । तन्त्रोक्ते कवचभेदे तच्च तन्त्रसारे द्रष्टव्यम् ।

**अक्षौहिणी** स्त्री ऊहः समूहः संविकल्पकज्ञानं वा सोऽस्या-मस्ति इनि, अक्षाणां रथानां सर्व्वेषामिन्द्रियाणाम् "वा ऊहिनी णत्वं वृद्धिश्च । रथगजतुरङ्गपदाति-संख्याविशेषा-न्विते सेनासमूहे । "अक्षौहिण्यामित्यधिकैः सप्तत्या चाष्टभिः शतैः । संयुक्तानि सहस्राणि गजानामेकविंशतिः । एवमेव रथानान्तु संख्यानं कीर्त्तितं बुधैः । पञ्चषष्टिः सहस्राणि षट् शतानि दशैव तु । संख्यातास्तुरगास्तज्ज्ञै-र्विना रथ्यतुरङ्गमैः । नृणां शतसहस्रं तु सहस्राणि न वैव तु । शतानि त्रीणि चान्यानि पञ्चाशच्च पदातय इति । रथाः २१८७० । गजाः २१८७० । रथवाहकाश्व-भिन्नाः अश्वाः ६५६१० । पदातयः १०९३५० ।

**अक्ष्ण** त्रि० अश्नुते व्याप्नोति अश-क्स्न । व्यापके अखण्डे काले न० अक्ष्णया दक्षिणेऽंसे श्रेण्यां श्रेण्यामंसे, इति वेदः ।

**अखट्ट** पु० खट्ट-अच् न०त० । पियालवृक्षे (पियासाल)

**अखट्टि** स्त्री खट्ट-इ न०त० वा ङीप् । अशिष्टव्यवहारे ।

**अखण्ड** त्रि० खडि-घञ् न०त० । संपूर्णे, सकले "अख-ण्डसाम्राज्यपतितत्वमेतीति" जातकम् खण्डभिन्ने पु०न० ।

**अखण्डन** पु० न खण्ड्यते निरवयवत्वात् खडि-ल्युट् न०त० खण्डनानर्हे परमात्मनि, पूर्ण त्रि० । [च ।

**अखण्डित** त्रि० खडि-क्त न०त० । सम्पूर्णे, "खण्डितभिन्ने

**अखण्डितर्त्तु** पु० अखण्डितः ऋतुः तत्सम्पत् पुष्पादि-प्रसवरूपा यत्र पुष्पादि-सर्वसम्पद्युक्ते ऋतुकाले ।

**अखलीकार** पु० न खलः अखलस्तस्य कारः अखल+च्वि-कृ-घञ् । सप्रयोजनताविधाने अखलान्यथासम्पादने ।

**अखेटिक** पु० न खेटत्यस्मात् खिट-भये घिकन् । वृक्षमात्रे ।

**अखात** पु०न० खन-क्त न०त० । देवखाते, मनुष्याद्यखाते च । खातभिन्ने त्रि० । "खातमखातमुत सक्तमिति" वेदः ।

**अखाद्य** त्रि० खाद-अर्हार्थे ण्यत् न०त० । भोजनानर्हे गोमांसादौ, भक्ष्यभिन्ने च ।

**अखिद्र** त्रि० खिद्-रक् न०त० । खेदरहिते "मरुतोयातेमखि द्रयामभिरिति" वेदः ।

**अखिन्न** त्रि० खिद्-भावे क्त त०ब० । क्लेशरहिते अनाया-ससाध्ये कर्म्मणि खेदरहिते कर्त्तरि च । कर्त्तरि क्त न०त० । अक्लिष्टे ।

**अखिल** त्रि० न खिल्यते न कणश आदीयते खिल-क न०त० । समग्रे । खिलाभिन्ने कृष्टभूम्यादौ स्त्री । नास्ति खिलमवशिष्टं यस्य शेषशून्ये "वेदोऽखिलोधर्म्म-मूलं स्मृतिशीले च तद्विदामिति" मनुः । तेन सिंहास